श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये द्विचत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये द्विचत्वारिंशं दशकम् ॥

## शकटासुरवधवर्णनम्

कदापि जन्मर्क्षदिने तव प्रभो
 निमन्त्रितज्ञातिवधूमहीसुरा।
महानसस्त्वां सविधे निधाय सा
 महानसादौ ववृते व्रजेश्वरी ॥ **42.1** ॥

ततो भवत्त्राणनियुक्तबालक -
 प्रभीतिसङ्क्रन्दनसङ्कुलारवैः।
विमिश्रमश्रावि भवत्समीपतः
 परिस्फुटद्दारुचटच्चटारवः ॥ **42.2** ॥

ततस्तदाकर्णनसम्भ्रमश्रम -
 प्रकम्पिवक्षोजभरा व्रजाङ्गनाः।
भवन्तमन्तर्ददृशुस्समन्ततो
 विनिष्पतद्दारुणदारुमध्यगम् ॥ **42.3** ॥

शिशोरहो किं किमभूदिति द्रुतं
 प्रधाव्य नन्दः पशुपाश्च भूसुराः।
भवन्तमालोक्य यशोदया धृतं
 समाश्वसन्नश्रुजलार्द्रलोचनाः ॥ **42.4** ॥

कस्को नु कौतस्कुत एष विस्मयो
 विशङ्कटं यच्छकटं विपाटितम्।

न कारणं किञ्चिदिहेति ते स्थिताः
    स्वनासिकादत्तकरास्त्वदीक्षकाः ॥ **42.5** ॥

कुमारकस्यास्य पयोधरार्थिनः
    प्ररोदने लोलपदाम्बुजाहतम्।
मया मया दृष्टमनो विपर्यगा -
    दितीश ते पालकबालका जगुः ॥ **42.6** ॥

भिया तदा किञ्चिदजानतामिदं
    कुमारकाणामतिदुर्घटं वचः।
भवत्प्रभावाविदुरैरितीरितं
    मनागिवाशङ्क्यत दृष्टपूतनैः ॥ **42.7** ॥

प्रवालताम्रं किमिदं पदं क्षतं
    सरोजरम्यौ नु करौ विरोजितौ।
इति प्रसर्पत्करुणातरङ्गिता -
    स्त्वदङ्गमापस्पृशुरङ्गनाजनाः ॥ **42.8** ॥

अये सुतं देहि जगत्पतेः कृपा -
    तरङ्गपातात्परिपातमद्य मे।
इति स्म सङ्गृह्य पिता त्वदङ्गकं
    मुहुर्मुहुः श्लिष्यति जातकण्टकः ॥ **42.9** ॥

अनोनिलीनः किल हन्तुमागतः
    सुरारिरेवं भवता विहिंसितः।
रजोऽपि नो दृष्टममुष्य तत्कथं
    स शुद्धसत्त्वे त्वयि लीनवान् ध्रुवम् ॥ **42.10** ॥

प्रपूजितैस्तत्र ततो द्विजातिभि -
    र्विशेषतो लम्भितमङ्गलाशिषः।

व्रजं निजैर्बाल्यरसैर्विमोहयन्
मरुत्पुराधीश रुजां जहीहि मे ॥ **42.11** ॥

॥ इति श्रीमन्नारायणीये द्विचत्वारिंशं दशकं समाप्तम् ॥